# सुन्दरकाण्ड एकषष्टितमः सर्गः (६१) - ॥ मधुवन भञ्जनम्॥

ततो जाम्बवतो वाक्य मगृह्णन्त वनौकसः ।
अङ्गद प्रमुखा वीरा हनूमांश्च महाकपिः ॥ १ ॥

प्रीतिमन्तस् ततस् सर्वे वायुपुत्र पुरःसराः ।
महेन्द्राद्रिं परित्यज्य पुप्लुवुः प्लवगर्षभाः ॥ २ ॥

मेरुमन्दर सङ्काशा मत्ता इव महागजाः ।
छादयन्त इवाकाशं महाकाया महाबलाः ॥ ३ ॥

सभाज्यमानं भूतैस्त मात्मवन्तं महाबलम् ।
हनुमन्तं महावेगं वहन्त इव दृष्टिभिः ॥ ४ ॥

राघवे चार्थ निर्वृत्तिं कर्तुं च परमं यशः ।
समाधाय समृद्धार्थाः कर्म सिद्धिभि रुन्नताः ॥ ५ ॥

प्रियाख्या नोन्मुखाः सर्वे सर्वे युद्धाभि नन्दिनः ।
सर्वे राम प्रतीकारे निश्चितार्था मनस्विनः ॥ ६ ॥

प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः ।
नन्दनोपम मासेदुर् वनं द्रुम लतायुतम् ॥ ७ ॥

यत्तन् मधुवनं नाम सुग्रीवस्याभि रक्षितम् ।
अधृष्यं सर्व भूतानां सर्वभूत मनोहरम् ॥ ८ ॥

यद्रक्षति महावीर्यः सदा दधिमुखः कपिः ।
मातुलः कपि मुख्यस्य सुग्रीवस्य महात्मनः ॥ ९ ॥

ते तद्वन मुपागम्य बभूवुः परमोत्कटाः ।
वानरा वानरेन्द्रस्य मनःकान् तमं महत् ॥ १० ॥

ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत् ।
कुमार मभ्य याचन्त मधूनि मधु पिङ्गलाः ॥ ११ ॥

ततः कुमारस् तान् वृद्धान् जाम्बवत् प्रमुखान् कपीन् ।
अनुमान्य ददौ तेषां निसर्गं मधुभक्षणे ॥ १२ ॥

ततश्चानुमताः सर्वे सम्प्रहृष्टा वनौकसः ।
मुदिताः प्रेरिताश्चापि प्रनृत्यन्तोऽभवंस् ततः ॥ १३ ॥

गायन्ति केचित् प्रणमन्ति केचित्
नृत्यन्ति केचित् प्रहसन्ति केचित् ।
पतन्ति केचिद् विचरन्ति केचित्
प्लवन्ति केचित् प्रलपन्ति केचित् ॥ १४ ॥

परस्परं केचिदुपा श्रयन्ते
परस्परं केचिदुपा क्रमन्ते ।
परस्परं केचिदुप ब्रुवन्ते
परस्परं केचिदुपा रमन्ते ॥ १५ ॥

द्रुमाद् द्रुमं केचि दभिद्रवन्ते
क्षितौ नगाग्रान् निपतन्ति केचित् ।
महीतलात् केचि दुदीर्ण वेगा
महा द्रुमाग्राण् यभि सम्पतन्ति ॥ १६ ॥

गायन्त मन्यः प्रहसन् नुपैति
हसन्त मन्यः प्ररुदन् नुपैति ।
रुदन्त मन्यः प्रणदन् नुपैति
नुदन्त मन्यः प्रणुदन् नुपैति ॥ १७ ॥

समाकुलं तत् कपिसैन्य मासीत्
मधु प्रपानोत्कट सत्त्व चेष्टम् ।
न चात्र कश्चिन्न बभूव मत्तो
न चात्र कश्चिन्न बभूव तृप्तः ॥ १८ ॥

ततो वनं तैः परिभक्ष्यमाणं
द्रुमांश्च विध्वंसित पत्रपुष्पान् ।
समीक्ष्य कोपाद् दधि वक्त्र नामा
निवारयामास कपिः कपींस् तान् ॥ १९ ॥

स तैः प्रवृद्धैः परि भर्त्स्यमानो
वनस्य गोप्ता हरिवीर वृद्धः ।
चकार भूयो मतिमुग्र तेजा
वनस्य रक्षां प्रति वानरेभ्यः ॥ २० ॥

उवाच कांश्चित् परुषाणि धृष्टम्
असक्त मन्यांश्च तलैर् जघान ।
समेत्य कैश्चित् कलहं चकार
तथैव साम्नोप जगाम कांश्चित् ॥ २१ ॥

स तैर्मदात् सम्परिवार्य वाक्यै:
बलाच्च तेन प्रति वार्यमाणैः ।

प्रधर्षितस् त्यक्त भयैः समेत्य
प्रकृष्यते चाप्यन वेक्ष्य दोषम् ॥ २२ ॥

नखैस्तु दन्तो दशनैर् दशन्तः
तलैश्च पादैश्च समापयन्तः ।
मदात् कपिं तं कपयः समग्रा
महावनं निर्विषयं च चक्रुः ॥ २३ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥